GYANBODH
An International Multidisciplinary Peer Reviewed Journal

ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

गर्भोपनिषत्केन्द्रितं भारतीयकथासाहित्यम् : प्रथमसहस्रदिवसेषु कथाश्रवणस्य शिशुविकासे भूमिकायाः शास्त्रीयदृष्ट्या परिशीलनम्

Authors

Vivek Sankaliya[1], Dr. Jay Oza [2]

[1] Ph.D. Research Scholar, Children's Research University, Gandhinagar

[2] Assistant Professor (Sanskrit), Children's Research University, Gandhinagar

email: *VIVEKSANKALIYA@GMAIL.COM*

सारांश

अस्मिन् शोधपत्रे गर्भाधानात् आरभ्य शिशोः द्विवर्षपर्यन्तं विस्तृतस्य कालस्य गर्भावस्थायां कथावाचनस्य स्वरूपं, विधिः, प्रयोजनं, मर्यादाश्च संस्कृतशास्त्राणाम् आधारेण विवेचनं क्रियते। अस्मिन् शोधपत्रे गर्भोपनिषद् गर्भाधानतः शिशोः द्वितीयवर्षपर्यन्तं प्रवर्तमानः प्रथमसहस्रदिवसीयः कालखण्डः शिशुविकासस्य दृष्ट्या अत्यन्तं संवेदनशीलः इति विवेचनं क्रियते। । भारतीयशास्त्रसाहित्ये तु एतस्य कालस्य महत्त्वं सहस्राब्दप्राचीनं मन्तव्यम्, विशेषतः ऐतरेयोपनिषदि प्रतिपादिते त्रिविधजन्मसिद्धान्ते, यत्र माता एव आदौ संस्कार्या भवति इति दृढतया प्रतिपादितम् **"सा भावयित्री भावयितव्या भवति।"** अस्य शोधस्य केन्द्रीया समस्या इयम् भारतीयकथासाहित्ये उपलब्धानां असंख्यातानां आख्यानानां मध्ये कस्यां शिशुविकासावस्थायां का कथा श्रवणीया, इति निर्णयस्य कृते अद्यावधि कोऽपि व्यवस्थितः, शास्त्राधारितः च मापदण्डः न प्रस्तुतः। लोकप्रिये गर्भसंस्कारविमर्शे कथाचयनं प्रायः यादृच्छिकं वा भावुकताप्रधानं भवति; परन्तु तस्य चयनस्य आधारः गर्भस्थशिशोः श्रवणेन्द्रियविकासक्रमः तथा मातुः तत्कालीनावस्था च भवितुमर्हतः। अस्य सन्दर्भे कथा केवलं गर्भस्थशिशुं न संस्करोति, अपि तु **"कथा प्रथमं मातरमेव संस्करोति। माता संस्कृता चेत्, तस्याः भावाः, वाणी, आचरणं च गर्भस्थशिशोः सत्त्वस्य प्रथमं वातावरणं निर्मान्ति"**। एतादृशस्य मातृ-गर्भस्थशिशुसम्बन्धस्य शास्त्रीयं स्वरूपं चरकसंहितायां प्रतिपादितस्य "द्वैहृदय्य"सिद्धान्ते द्रष्टुं शक्यते। तत्र गर्भिण्याः हृदयस्य गर्भस्थशिशोः हृदयेन सम्बन्धः प्रतिपाद्यते "मातृजमेवास्य हृदयं, तन्मातुर्हृदयेन सम्बद्धं भवति रसवाहिनीभिर्धमनीभिः; तस्मात् श्रद्धाः परस्परमनुबध्नन्ति,

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

तस्माच्चैतां 'द्विहृदयां' नारीं दौहृदिनीमाचक्षते" (Charaka Samhita, translated by P. V. Sharma, vol. 1, Chaukhambha Orientalia, 2014, Sharira Sthana, ch. 4, verse 15)। एतेन सिद्धान्तेन मातुः भावात्मकानुभवानां गर्भस्थजीवेन सह सम्बन्धस्य एकः प्राचीनः सांस्कृतिकः दृष्टिकोणः प्रकाशते।

एतां समस्यां सम्बोध्य, अयं शोधः गर्भोपनिषदि, तथा अन्येषु प्रामाणिकेषु शास्त्रग्रन्थेषु निहितान् सूत्रान् आधृत्य, सम्पूर्णं सहस्रदिवसीयं कालं शिशोः श्रवणसामर्थ्यविकासस्य, मातुः मानसिकावस्थापरिवर्तनस्य च द्वयोः मापदण्डयोः आधारेण क्रमिकासु अवस्थासु विभजति, तथा प्रत्येकस्यां अवस्थायां उपयुक्तानां कथानां चयनाय शास्त्रसम्मतं, प्रमाणसहितं च प्रतिमानं प्रस्तौति। सह एव, भयजनकानां, हिंसाप्रधानानां च कथांशानां गर्भकाले वर्जनस्य सिद्धान्तः अपि परीक्षितः, यतो हि गर्भिण्याः मानसिकी स्वस्थता एव गर्भकल्याणस्य प्रथमः आधारः इति शास्त्रवचनम्। **अयं शोधः भारतीयज्ञानपरम्परायाः आधारेण गर्भसंस्कारकथासाहित्यस्य अवस्थानुरूपं, मातृभावसंगतं च व्यवस्थितं वर्गीकरणं प्रथमवारं प्रस्तौति इति अस्य मौलिकं योगदानम्**। "प्रथमसहस्रदिवसानां कस्यां विकासावस्थायां कस्याः कथायाः चयनं, कथनं तथा पुनरावृत्तिः कथं करणीयम्?" इति अस्ति। प्रस्तुतशोधे आधुनिकप्रथमसहस्रदिवस-अवधारणायाः व्यापकं विकासात्मकं रूपरेखां आधाररूपेण स्वीकृत्य भारतीयकथासाहित्यस्य अवस्थोचितं चयनं, क्रमबद्धीकरणं तथा प्रयोगविधेः निर्देशः प्रस्ताव्यते। अस्यां दृष्ट्या कथा केवलं मनोरञ्जनस्य साधनं न, अपि तु बालकस्य प्रारम्भिकजीवने श्रवणस्य, भाषिकपरिचयस्य, भावात्मकसम्बन्धस्य,तथा मूल्यपरिचयस्य सांस्कृतिकमाध्यमरूपेण परिगण्यते। एषः प्रथमसहस्रदिवसाधारितः अवस्थोचित-कथा-चयनविन्यासः प्रस्तुतशोधस्य प्रमुखः मौलिकशोधप्रस्तावः अस्ति।

Keywords: गर्भसंस्कारः, गर्भोपनिषद्, प्रथमसहस्रदिवसः, कथासाहित्यम्, मातृगीतानि, वैदिकमन्त्राः, मातृवाणी, प्रारम्भिकविकासः, संस्कारः, पञ्चकोशसिद्धान्तः, बालमनोविज्ञानम्, विकसितभारत्-२०४७

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

१.भूमिका, शोधसमस्या तथा शोधस्य उद्देश्यानि

भारतीयज्ञानपरम्परायां शिशोः विकासः जन्मनः पूर्वमेव आरभमाणः इति दृढं मन्तव्यम्। गर्भः केवलं जैविकी वृद्धिः न, अपितु संस्काराणां, श्रवणस्य, स्मृतेः च आरम्भबिन्दुः इति उपनिषत्-स्मृति-पुराणपरम्परायां सुव्यक्तम्। ऐतरेयोपनिषदि जन्मत्रयस्य या व्याख्या प्रस्तुता, तत्र प्रथमं जन्म मातुः गर्भे एव आरभते इति स्पष्टं प्रतिपादितम्

"सा भावयित्री भावयितव्या भवति। तां स्त्रीं गर्भं बिभर्ति। सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति॥"

अनेन वाक्येन उपनिषत् स्पष्टं कथयति यत् बालकस्य प्रथमः संस्कारकर्ता माता एव, तस्याश्च मानसिकी, भावात्मकी च अवस्था गर्भस्थशिशोः निर्माणे प्रत्यक्षं योगं ददाति।

सामान्यतः माता स्वपरम्परानुसारं, स्वाभिरुच्यानुसारं वा उपलब्धां काञ्चित् कथां कथयति। किन्तु प्रथमसहस्रदिवसाः स्वयं क्रमशः परिवर्तमानानां विकासात्मकावस्थानां कालः अस्ति। अतः सर्वासु अवस्थासु समानप्रकारस्य कथा समानरीत्या कथनीया इति मान्यता विकासात्मकदृष्ट्या पर्याप्ता न भवति। प्रस्तुतशोधस्य मूलप्रश्नः अतः केवलं "कथा कथनीया वा?" इति न, अपि तु

एतस्याः परम्परायाः एकं प्रमुखं अङ्गं कथाश्रवणम् अस्ति। हितोपदेशात्, पञ्चतन्त्रात्, जातकेभ्यः, उपनिषद्भ्यः, इतिहासपुराणेभ्यश्च गृहीताः कथाः सहस्राब्दीभ्यः भारतीयकुटुम्बेषु गर्भिणीभ्यः, शिशुभ्यश्च श्राव्यन्ते। किन्तु आधुनिके लोकप्रिये गर्भसंस्कारविमर्शे एतासां कथानां चयनं प्रायः असङ्गतं, भावुकं वा दृश्यते यत्र कस्यचित् अवस्थाविशेषस्य औचित्यं, शिशोः श्रवणसामर्थ्यस्य वास्तविकं स्तरं, मातुः तत्कालीनां मानसिकीम् अवस्थां च न विचार्य, यादृच्छिकतया कथाः चीयन्ते। अतः एतासां कथानां शास्त्रसम्मतं, क्रमबद्धं च वर्गीकरणं कर्तुम् अयं शोधः प्रवृत्तः।

गर्भोपनिषद् अस्य अध्ययनस्य विशेषं प्रवेशद्वारम् अस्ति। उपनिषत् शरीरस्य पञ्चात्मकतां, इन्द्रियसम्बन्धान्, गर्भविकासस्य मासानुक्रमं, मातुः अशितपीतद्रव्यैः प्राणस्य आप्यायनम्, नवमे मासि पूर्वजातिस्मरणं तथा ओङ्कारचिन्तनं च निरूपयति। एतेषु प्रतिपादनेषु केचन दार्शनिकाः, केचन पूर्ववैज्ञानिकशारीरविषयकाः, केचन

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

च धार्मिक, आध्यात्मिकाः सन्ति। यथा पूर्वं निर्दिष्टम्, एतत् दार्शनिकं प्रमाणमेव, न वैज्ञानिकम्। **(गर्भोपनिषद् 1.5)**।

भारतीया ज्ञानपरम्परा जीवनस्य आरम्भं जन्मनः न, गर्भाधानात् एव मन्यते। गर्भाधान-पुंसवन-सीमन्तोन्नयनादयः संस्काराः तस्याः साक्षिणः। तत्र गर्भः निष्क्रियः पिण्डमात्रं न गण्यते; मातुः आहारः, आचारः, विचारः, वाक्, परिवेशश्च तस्य पोषकाः इति दृष्टिः प्रवर्तते। अस्मिन् प्रसङ्गे कथा विशिष्टं स्थानं भजते। कथा रञ्जयति, स्मारयति, बोधयति, भावयति च; अतः शुष्कोपदेशात् सा सुकरतरा सन्मार्गप्रवर्तिका। हितोपदेशकारः आह :

यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।

कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ॥

(हितोपदेश, प्रस्तावना भाग ,१६)

अत्र "बालानाम्" इत्युक्तम्; परं संस्कारस्य आरम्भः गर्भकालात् इति परम्परा वर्तते, अतः कथासंस्कारस्यापि आरम्भः तत्र कल्पयितुं शक्यते। अस्मिन् शोधे पूर्वाचार्याणां वचांसि, तेषां व्याख्याः, लोकानुभवः, युक्तिश्च प्रमाणत्वेन गृहीताः।

२. शोधसमस्या

गर्भोपनिषदि, ऐतरेयोपनिषदि, आयुर्वेदसंहितासु च गर्भिण्याः मानसिकावस्थायाः, गर्भस्य क्रमिकविकासस्य च विस्तृतं वर्णनम् उपलभ्यते। तथापि, एतत् शास्त्रीयं ज्ञानं कथासाहित्येन सह व्यवस्थितरूपेण अद्यावधि न सम्बद्धम्। परिणामतः द्वे प्रमुखे त्रुटी उत्पद्येतेप्रथमा, भयहिंसाप्रधानानि आख्यानानि (यथा अभिमन्युवधः, द्रौपदीवस्त्रापहरणम्) अविवेकेन गर्भिणीभ्यः श्राव्यन्ते, यत् गर्भिण्याः मानसिकं तनावं वर्धयितुं शक्नोति; द्वितीया, दार्शनिकगहनानि, वयोऽनुपयुक्तानि च आख्यानानि (यथा गर्भोपनिषदः नवममासीयं पूर्वजातिस्मरणवर्णनम्) शिशुश्रवणार्थं प्रयुज्यन्ते, यद्यपि तानि मूलतः तात्त्विकविवेचनाय, न तु मातृश्रवणाय, रचितानि। अतः शोधसमस्या इयम्भारतीयशास्त्रसाहित्ये उपलब्धानां कथानां मध्ये, शिशोः श्रवणेन्द्रियविकासक्रमस्य, मातुः

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

मानसिकभावात्मकावस्थायाश्च आधारेण, कासां कथानां कस्यां अवस्थायां औचित्यम्, इति निर्धारयितुं कोऽपि शास्त्रसम्मतः, व्यवस्थितः च मापदण्डः अद्यावधि उपलब्धः नास्ति।

३. शोधस्य उद्देश्यानि

अस्य शोधस्य उद्देश्यानि पञ्च सन्ति (क) गर्भाधानतः शिशोः द्विवर्षवयःपर्यन्तं प्रवर्तमाने प्रथमसहस्रदिवसीये काले, भारतीयशास्त्रसाहित्ये (उपनिषत्सु, इतिहासे, पुराणेषु, हितोपदेशे, पञ्चतन्त्रे, जातकेषु च) उपलब्धानां शिशुविकासोपयुक्तानां कथानां सर्वेक्षणं, सङ्कलनं च कर्तुम्;

(ख) ऐतरेयोपनिषदि, गर्भोपनिषदि च वर्णितस्य शिशोः क्रमिकश्रवणविकासस्य आधारेण, सम्पूर्णं सहस्रदिवसीयं कालं शास्त्रसम्मतासु अवस्थासु विभजितुम्;

(ग) प्रत्येकस्याम् अवस्थायां गर्भिण्याः, नवमातुः वा सम्भाव्यां मानसिकभावात्मकाम् अवस्थाम् आयुर्वेदसंहितानाम्, स्मृतीनां च आधारेण निर्धार्य, तया सह सङ्गतानां कथानां चयनमापदण्डं प्रस्तावयितुम्;

(घ) गर्भकाले, शैशवकाले च वर्जनीयानां भयहिंसाप्रधानानाम्, वयोऽनुपयुक्तानां वा कथांशानां शास्त्राधारेण निर्धारणं कर्तुम्;

(ङ) एतैः सर्वैः आधारेण, गर्भसंस्कारकथासाहित्यस्य अवस्थानुरूपं, मातृभावसंगतं च व्यवस्थितं, प्रमाणसहितं च प्रतिमानं प्रस्तावयितुम्, यत् भविष्ये कुटुम्बेषु, शिक्षणसंस्थासु च व्यावहारिकतया प्रयोक्तुं शक्यते।

४.शोधप्रश्नाः तथा शोधविधिः

भारतीयसाहित्ये कथानां गर्भकालीन-शैशवकालीनप्रयोगाः बालस्य भाषिक, मानसिक, भावात्मक तथा सामाजिकविकासे कथं सहायकाः भवन्ति, तथा एतेषु प्रयोगेषु निहिताः के सांस्कृतिकमूल्याः दृश्यन्ते? आधुनिकशोधे तथा UNICEF-संस्थायाः प्रतिपादने प्रथमसहस्रदिवसानां महत्त्वं, पोषणस्य भूमिका, प्रारम्भिकमस्तिष्कविकासः, responsive caregiving, early learning तथा स्नेहपूर्ण-सुरक्षितपरिवेशः इत्यादयः विषयाः स्पष्टतया प्रतिपादिताः सन्ति। किन्तु प्रथमसहस्रदिवसानां

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

विशिष्टविकासावस्थाम् अनुसृत्य कस्यां अवस्थायां का कथा कथनीया, कथावस्तु कियती सरलता-जटिलतया भवेत्, कथनस्य पद्धतिः कथं परिवर्तनीया, पुनरावृत्तिः तथा संवादः कदा कथं च प्रयोजनीयौ इति प्रश्नस्य व्यवस्थितं कथा-कथनाधारितं प्रतिमानं उक्तेषु स्रोतःषु प्रत्यक्षतया निर्दिष्टं न दृश्यते।

विश्लेषणस्य चतस्रः श्रेण्यः निर्धारिताः। तासां प्रत्येकस्याः श्रेण्याः परीक्षणं तत्तत्सम्बद्धैः साहित्यिकैः वैज्ञानिकैश्च प्रमाणैः करिष्यते

(क) गर्भकालीनश्रवणं परिचयश्च - अस्यां श्रेण्यां गर्भस्थशिशोः श्रवणसम्बन्धिनः प्राचीनभारतीयवाङ्मयस्थाः उल्लेखाः, मातृवाणीगीतादीनां प्रयोगाः तथा गर्भस्थशिशुना ध्वनेः ग्रहणसम्बन्धिनः आधुनिकानुसन्धाननिष्कर्षाः परिशील्यन्ते। अत्र शास्त्रीयवर्णनानि आधुनिकवैज्ञानिकप्रमाणानि च पृथक् स्थापयित्वा तयोः सामञ्जस्यं भेदं च परीक्ष्यते।

(ख) शैशवकालीनसंवादः कथा च - अस्यां श्रेण्यां बालकेन सह मातापित्रोः संवादः, कथाकथनम् पुनःपुनः श्रावणीयानां वाचिकप्रयोगाणां स्वरूपं परीक्ष्यते। तेषां भाषाविकासेन, स्मरणशक्त्या, भावसम्बन्धेन तथा सामाजिकव्यवहारेण सह सम्बन्धः प्राचीनसाहित्यस्य उदाहरणैः आधुनिकभाषाविकास-अनुसन्धानैश्च परिशील्यते।

५. कथाश्रवणसन्दर्भे गर्भोपनिषद् : शरीर-प्राण-इन्द्रिय-चेतनासमन्वयस्य मूलदृष्टिः

अत्र गर्भोत्पत्तिः जीवितपरम्परायाः प्रारम्भिकावस्थारूपेण निरूपिता। "तदस्य प्रथमं जन्म" इति पदप्रयोगः जन्मनः केवलं प्रसवकालिकत्वं न स्वीकरोति; गर्भाधानमेव सत्त्वस्य जन्मपरम्परायाः प्रथमः सोपानम् इति उपनिषद् स्वकीयया दार्शनिकभाषया प्रतिपादयति। एतेन वचनेन गर्भोपनिषदः षष्ठमासिकश्रोत्रनिर्देशेन सह संयुक्तेन प्रकृतशोधस्य कालपरिधिः - गर्भाधानतः आरभ्य द्विवर्षपर्यन्तं प्रथमसहस्रदिवसाः - शास्त्रीयाधारं लभते।

तत् स्त्रियामात्मभूयं गच्छति यथा स्वमङ्गं तथा ।
तस्मादेनां न हिनस्ति सा अस्यैतमात्मानमत्र गतं भावयति ॥ (ऐतरेयोपनिषत् २.४.२)

अस्य मन्त्रस्य वैशिष्ट्यम् - मातृत्वं केवलं गर्भधारणरूपेण न स्वीक्रियते, अपि तु भावनात्मक-पोषणात्मकं दायित्वमपि तत्र अन्तर्भाव्यते। अनन्तरं स्पष्टमेवोक्तम् "सा भावयित्री भावयितव्या भवति" इति। अत्र "भावन" पदं

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

द्विमुखम् - माता गर्भं भावयति, समाजश्च मातरं भावयति। **कथाश्रवणं एतस्य भावनप्रक्रियायाः श्रव्यमाध्यमम् इति दृष्ट्वा कथाश्रवणं केवलं गर्भिण्याः व्यक्तिगतरुचिविषयः न, अपितु पारिवारिकं सामाजिकं च कर्तव्यम् इति व्याख्यातुं शक्यते। एषा भावना आयुर्वेदीयगर्भिणीपरिचर्यापरम्परया अपि साम्यं वहति, यत्र गर्भिण्याः हितकराभ्यां प्रियाभ्यां च आहारविहाराभ्यां परिचर्यायै विशेषं महत्त्वं प्रदीयते; तत्र "प्रियविहार" इत्यस्य अन्तर्गतं कथाश्रवणं सहजतया समाविशति।**

६. कथासाहित्यम्: गर्भस्थश्रवणस्य सांस्कृतिकप्रतिमानानि

भारतीयज्ञानपरम्परायां गर्भावस्था केवलं शरीरनिर्माणस्य कालः न मन्यते। गर्भस्थशिशुः चेतनासम्पन्नः, संस्कारग्राही, श्रवणशीलः तथा भावानुभवसमर्थः जीवः इति अनेकासु शास्त्रीयासु आख्यासु प्रतिपादितम्। अतः गर्भिणीमाता यत् शृणोति, यत् वदति, यत् चिन्तयति, यत् अनुभवति, तथा गर्भस्थशिशुना सह यः स्नेहपूर्णः संवादः स्थाप्यते, तस्य भावी बालकस्य मनोवृत्तौ, संस्कारेषु, आचरणे च प्रभावः भवतीति भारतीयपरम्परायां दृढं विश्वासः दृश्यते। अत्र कथाकथनं केवलं मनोरञ्जनस्य साधनं न, अपि तु गर्भस्थसत्त्वस्य भावसंस्कारस्य, श्रवणपरिचयस्य, मातृस्नेहस्य तथा पारिवारिकचेतनायाः माध्यमम् इति द्रष्टव्यम्। निम्नलिखितानि आख्यानानि एतस्याः दृष्टेः प्रतिनिधिरूपेण चयनितानि।

७. प्रह्लादस्य गर्भस्थश्रवणम् (श्रीमद्भागवतपुराणम्, सप्तमस्कन्धः, सप्तमाध्यायः)

भारतीयग्रन्थेषु गर्भस्थशिशुना सह कथासंवादस्य सर्वाधिकं प्रसिद्धम् उदाहरणं प्रह्लादस्य कथायां दृश्यते। श्रीमद्भागवतपुराणे वर्णितं यत् हिरण्यकशिपोः पत्नी कयाधूः गर्भवती आसीत्। इन्द्रः तां बन्दिनीं कर्तुं प्रयतमानः आसीत्, किन्तु नारदमुनिना सा रक्षिता। नारदस्य आश्रमे कयाधूः निवसन्ती तस्मात् भगवद्भक्तेः, आत्मज्ञानस्य, धर्मस्य च उपदेशम् अशृणोत्। कयाधूः तत् वचनं शृणोति स्म; तस्याः गर्भे स्थितः प्रह्लादः अपि तं धर्मोपदेशं श्रुतवान् इति भागवतपुराणे प्रतिपादितम्। जन्मानन्तरं प्रह्लादः दैत्यगुरुकुले शिक्षितः अपि आसुरं भावं न स्वीकृतवान्; सः बालान् प्रति भगवद्भक्तेः उपदेशं ददौ-

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

श्रीनारद उवाच-

एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः।

उवाच तान् स्मयमानः स्मरन् मदनुभाषितम्॥ (श्रीमद्भागवतपुराणम् ७.७.१)

अस्य आख्यानस्य आशयः एषः यत् गर्भस्थशिशुः केवलं देहधारी पिण्डः न, अपि तु मातुः श्रवणानुभवेन, भावेन, परिवेशेन च संस्कारं गृह्णाति इति पुराणकथा सूचयति; प्रह्लादस्य भक्तिः केवलं जन्मोत्तरशिक्षया न, अपि तु गर्भकालीनश्रवणेन पूर्वमेव संस्कृता इति आख्यानस्य तात्पर्यम्। कयाधूः नारदाश्रमे भयरहितं, हिंसारहितं च वातावरणं प्राप्तवती इति अंशः अपि उल्लेखनीयः; गर्भवत्याः सुरक्षा तथा शान्तं पारिवारिकवातावरणम् अपि प्रह्लादकथायाः अन्तर्निहितः सन्देशः। तथापि एतत् आख्यानरूपं प्रतिपादनम्, न तु आधुनिकभ्रूणविज्ञानस्य प्रयोगसिद्धं निष्कर्षम्, इति सर्वदा स्मर्तव्यम्।(श्रीमद्भागवतमहापुराणम्. सप्तमस्कन्धः, अध्यायः 7 (प्रह्लादचरितम्). गर्भस्थबालकस्य विकासार्थं अस्याः कथायाः सन्देशः एषः यत् मातुः समीपे शान्तं, स्नेहपूर्णं, सद्विचारयुक्तं च वातावरणं भवेत्; कथायाः उद्देश्यं गर्भस्थशिशुं जटिलं दार्शनिकज्ञानं शिक्षयितुं न, अपि तु मातृस्वरस्य, भावस्य तथा संस्कारस्य अनुकूलं वातावरणं निर्मातुम् अस्ति।

७. १ अष्टावक्रस्य गर्भस्थज्ञानम् (महाभारतम्, वनपर्व, अध्यायाः १३२–१३४)

महाभारते अष्टावक्रस्य कथा गर्भस्थबालकस्य श्रवणशक्तेः तथा ज्ञानग्राहकत्वस्य एकं विलक्षणं रूपं दर्शयति। कहोडऋषिः स्वपत्नीं सुजातां वेदपाठं श्रावयति स्म। तस्याः गर्भे स्थितः अष्टावक्रः पितुः वेदपाठं शृण्वन् आसीत्। एकदा सः पितुः उच्चारणे दोषं ज्ञात्वा गर्भादेव तं सावधानं कृतवान्-

गर्भस्थ एव भगवान् अष्टावक्रो महातपाः।

उवाच पितरं वाक्यं वेदपाठविचक्षणः॥ (महाभारतम्, वनपर्व १३२)

कहोडः तेन वचसा अप्रसन्नः सन् गर्भस्थं पुत्रं शशाप, यत् सः अष्टसु स्थानेषु वक्रशरीरेण जनिष्यते; तस्मादेव तस्य नाम "अष्टावक्रः" अभवत्। जन्मानन्तरं तु सः परमज्ञानी अभवत्; जनकराजस्य सभायां विदुषां मध्ये शास्त्रार्थं

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

कृत्वा सः आत्मज्ञानस्य महत्त्वं प्रतिपादितवान् (महाभारतम्. वनपर्व, अध्याय 132, 134, अष्टावक्रोपाख्यानम्. Page No. 319)।

अस्याः कथायाः तात्पर्यम् एतत् न यत् गर्भस्थशिशुः वयस्कवत् सम्पूर्णं शास्त्रज्ञानं गृह्णाति; अपि तु भारतीयपरम्परा गर्भस्थसत्त्वस्य श्रवणशीलतां, ध्वनिसंवेदनशीलतां तथा ज्ञानग्रहणस्य सम्भावनां आख्यानरूपेण व्यनक्ति। अष्टावक्रकथा माता-पितरौ प्रति एकं सन्देशं ददाति-गर्भस्थशिशोः समीपे उच्चार्यमाणा वाणी शून्ये न विलीयते; मधुरा, शान्ता, स्पष्टा च वाणी गर्भिण्याः मनसि प्रसादं जनयति, तेन च गर्भस्थसत्त्वस्य भावपरिवेशः अपि सौम्यः भवितुम् अर्हति। किन्तु शोधे इदं सावधानं वक्तव्यम् यत् अष्टावक्रकथा गर्भस्थशिशुना पूर्णवेदज्ञानप्राप्तेः वैज्ञानिकं प्रमाणं न, अपि तु देहातीतज्ञानस्य तथा गर्भस्थचेतनायाः आख्यानात्मकं प्रतीकम् अस्ति।

७. २ अभिमन्योः गर्भस्थश्रवणम् (महाभारतम्, द्रोणपर्व; लोकपरम्परायां विस्तृतम्)

अभिमन्युकथा भारतीयलोकपरम्परायां गर्भस्थशिशुना सह संवादस्य अत्यन्तं प्रसिद्धम् उदाहरणम्। लोकप्रचलितकथानुसारम् अर्जुनः सुभद्रां चक्रव्यूहस्य प्रवेशविधिं निष्क्रमणविधिं च कथयति स्म; सुभद्रा गर्भवती आसीत्, तस्याः गर्भे अभिमन्युः स्थितः आसीत्। अभिमन्युः प्रवेशविधिं श्रुतवान्, किन्तु यदा अर्जुनः निष्क्रमणविधिं वक्तुम् आरब्धवान्, तदा सुभद्रा निद्रां गता, संवादः च अपूर्णः अभवत्। तस्मात् अभिमन्युः प्रवेशं ज्ञातवान्, निष्क्रमणस्य तु पूर्णविधिं न ज्ञातवान्; युद्धे सः चक्रव्यूहे प्रविष्टः, परन्तु ततः निर्गन्तुं न शक्नुवन् वीरगतिं प्राप्तवान् (महाभारतम्. द्रोणपर्व, अभिमन्युवधप्रसङ्गः , Page No. 899-903)।

अस्याः कथायाः मूलसन्देशः एषः यत् गर्भस्थशिशुना सह कृतः संवादः, तस्य क्रमः, शिक्षायाः पूर्णता तथा ज्ञानस्य सम्पूर्णता-एतानि सर्वाणि महत्त्वपूर्णानि; अपूर्णः संवादः अपूर्णं ज्ञानं जनयितुं शक्नोति, पूर्णः क्रमबद्धः शान्तः च संवादः बालकस्य संस्कारनिर्माणे सहायकः भवितुम् अर्हति। एषा कथा लोकपरम्परायां प्रसिद्धा वर्तते, न तु महाभारतस्य सर्वेषु संस्करणेषु समानरूपेण उपलब्धा; अतः इदं सीधे आधुनिकभ्रूणविज्ञानस्य प्रमाणरूपेण उद्धर्तुं न युज्यते। अस्याः तात्पर्यं गर्भस्थशिशुं युद्धविद्यां शिक्षयितुम् आवश्यकम् इति न, अपि तु गर्भिणीमातुः समीपे कथ्यमानस्य विषयस्य, वाणीस्य, भावस्य तथा संवादस्य क्रमबद्धतायाः महत्त्वं प्रतिपादयितुम् अस्ति।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

७. ३ गर्भस्थवामदेवस्य आख्यानम्

अस्य सम्पूर्णप्रसङ्गस्य सर्वाधिकं महत्त्वपूर्णं तत्त्वं गर्भस्थवामदेवस्य आख्यानम् अस्ति। उपनिषद् पूर्वोक्तां जन्मपरम्परां ऋषिवचसा समर्थयति

गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा।

शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति।

गर्भ एवैतच्छयानो वामदेव एवमुवाच॥

(ऐतरेयोपनिषत् २.४.५)

"गर्भ एवैतच्छयानः" इति पदसमूहः विशेषतया विचारणीयः। उपनिषद् वामदेवस्य ज्ञानोक्तिं जन्मानन्तरकालिकानुभवरूपेण न, अपि तु गर्भावस्थायामेव प्रवृत्तवचनरूपेण आख्यायति। अतः भारतीयदार्शनिकपरम्परायां गर्भः केवलं शरीरविकासस्य स्थानं न, अपि तु चेतनायाः आत्मबोधस्य दार्शनिकविमर्शस्य च प्रतीकरूपेण दृश्यते।

"शतं मा पुर आयसीः" इत्यस्य अर्थनिर्णये तु सावधानता अपेक्षिता। "आयसीः पुरः" इत्यस्य लौकिकदुर्गरूपकत्वम्, शरीररूपबन्धनत्वम्, अथवा संसारबन्धनस्य दार्शनिकप्रतीकत्वम् एवं विविधाः व्याख्याः सम्भवन्ति। अतः शोधलेखे तस्य एकमेव आधुनिकवैज्ञानिकार्थः निश्चित इति प्रतिपादनं न युक्तम्। उपनिषदिकसन्दर्भे वामदेवस्य आत्मज्ञानजन्यबन्धमोचनस्य रूपकात्मकः आशयः विशेषतः ग्राह्यः। अन्ते उपनिषद् ज्ञानी वामदेवस्य शरीरविमोचनानन्तरममृतत्वप्राप्तिं प्रतिपादयति स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत्, समभवत्॥ (ऐतरेयोपनिषत् २.४.६)

अतः सम्पूर्णप्रसङ्गस्य गतिरेषा गर्भात् जन्मनि, जन्मतः कर्मणि, कर्मभ्यः पुनर्जन्मनि, पुनर्जन्मनः ज्ञानं प्रति, ज्ञानात् अमृतत्वं प्रति च प्रवर्तते। अस्मिन् क्रमदर्शने गर्भसत्त्वनं केवलं जैविकप्रारम्भः न, अपि तु सत्त्वस्य व्यापकस्य आध्यात्मिकप्रवासस्य प्रथमावस्था इति उपनिषदिकं प्रतिपादनं प्रकाशते।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

७. ४ गान्धार्याः गर्भः (महाभारतम्, आदिपर्व)

महाभारतस्य आदिपर्वणि गान्धार्याः गर्भवृत्तान्तः वर्णितः। गान्धारी दीर्घकालं यावत् गर्भं धारयन्ती आसीत्। यदा तया ज्ञातं यत् कुन्त्याः पुत्रः जातः, तदा सा दुःखिता अभवत्; अन्ततः तस्याः गर्भात् एकं मांसपिण्डम् उत्पन्नम्। व्यासेन तत् मांसपिण्डं शतधा विभज्य घृतपूर्णेषु कुम्भेषु स्थापितम्; कालान्तरे तेभ्यः कुम्भेभ्यः धृतराष्ट्रस्य शतं पुत्राः, एका च कन्या जज्ञिरे (महाभारतम्. आदिपर्व, गान्धारीगर्भप्रसङ्गः. Page No. 69)।

एषा कथा गर्भस्थविकासस्य जैविकं वर्णनं न ददाति; तस्याः महत्त्वं गर्भकालस्य दैर्घ्ये, मातुः प्रतीक्षायां, चिन्तायां च निहितम्। गान्धार्याः ईर्ष्या, भयं, दुःखं तथा अपेक्षा इत्येते भावाः सामाजिकैः, पारिवारिकैश्च परिणामैः सह सम्बध्यन्ते इति कथा सूचयति; अतः गर्भकाले मातुः मानसिकी अवस्था तथा तां परितः स्थितं सामाजिकं वातावरणम् अपि भारतीयकथासाहित्ये महत्त्वपूर्णं मन्यते।

७. ५ सीता, लवः, कुशः च (वाल्मीकिरामायणम्, उत्तरकाण्डम्)

वाल्मीकिरामायणस्य उत्तरकाण्डे वर्णितं यत् सीता गर्भवती अवस्थायां वाल्मीकेः आश्रमे न्यवसत्; तत्रैव लवस्य कुशस्य च जन्म अभवत्। वाल्मीकिः तयोः पालनं, संरक्षणं, शिक्षणं च कृतवान्; तौ वेदे, धनुर्वेदे, सङ्गीते, रामकथायां च पारङ्गतौ अभवताम् (वाल्मीकिरामायणम्, उत्तरकाण्डम्)।

इयं कथा गर्भावस्थातः जन्मोत्तरशैशवपर्यन्तं विस्तृतः एकः सलग्नः आख्यानप्रवाहः; अत्र त्रीणि तत्त्वानि सह कार्यं कुर्वन्ति । मातुः गर्भकालीनं संरक्षणम्, आश्रमस्य शान्तं शिक्षापूर्णं च वातावरणम्, गुरुणा दत्तं जन्मोत्तरं संस्कारशिक्षणं च। अतः गर्भकालः तथा जन्मोत्तरं प्रथमवर्षद्वयं भारतीयकथासाहित्ये पृथक् न मन्येते; मातृसुरक्षा, आश्रमीयं वातावरणम्, गुरुशिक्षा, कथाश्रवणं च मिलित्वा बालकस्य चरित्रं निर्मान्ति इति सीता-लवकुशाख्यानस्य सन्देशः।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

८. कथासंवादस्य पञ्चविधं स्वरूपम् तथा तस्य फलम्

उपर्युक्तानि आख्यानानि पर्यालोच्य भारतीयपरम्परायां गर्भस्थशिशुना सह कथासंवादस्य पञ्चविधं स्वरूपं द्रष्टुं शक्यते।

प्रथमं प्रेमपूर्णः संवादः-माता गर्भस्थशिशुं प्रति स्नेहपूर्वकं वदेत्; अयं संवादः शास्त्रेषु सूत्ररूपेण निर्दिष्टः न, किन्तु मातृभावनायाः परम्परया अस्य आधारः दृश्यते, एतेन च मातुः स्वमनसः शान्तिः जायते।

द्वितीयं मङ्गलवचनम्-माता शुभवचनानि, आशीर्वादान्, शान्तिमन्त्रान्, स्तोत्राणि वा पठेत्; मन्त्रस्य प्रयोजनं केवलं चमत्कारिकफलप्राप्तिः न, अपि तु उच्चारणस्य लयः, स्वरस्य माधुर्यं तथा मातुः मनसः प्रसादः अपि अस्ति।

तृतीयं सदाचारकथा- प्रह्लादः, रामः, सीता, ध्रुवः, नचिकेता, सावित्री, गार्गी, मैत्रेयी, जनकः, अष्टावक्रः इत्यादीनां कथाः कथयितुं शक्यन्ते, यासु सत्यं, धैर्यं, करुणा, आत्मविश्वासः, धर्मः, ज्ञानं, त्यागः, भक्तिः च प्रमुखाः भावाः भवन्ति।

चतुर्थं प्रकृतिसंवादः-माता पुष्पाणि, नद्यः, पर्वतान्, पक्षिणः, सूर्यं, चन्द्रं, वर्षां, वनानि च वर्णयेत्; भारतीयवाङ्मये प्रकृतिः जडद्रव्यं न, अपि तु सत्त्वन्तः सहचरः इव दृश्यते।

पञ्चमं जन्मानन्तरं निरन्तरः संवादः-गर्भस्थशिशुना सह आरब्धः संवादः जन्मानन्तरम् अपि निरन्तरं भवेत्; भारतीयगृह्यसूत्रेषु जातकर्म, नामकरण, निष्क्रमण, अन्नप्राशनादिसंस्काराः बालकस्य सत्त्वनं परिवारेण, समाजेन, देवपरम्परया च सह सम्बध्नन्ति। बालकः अर्थं न जानाति चेदपि स्वरं, मुखमुद्रां, लयं, स्नेहं च अनुभवितुं शक्नोति; अतः गर्भसंवादस्य फलं जन्मना सह न समाप्यते, तत् बाल्यावस्थायां भाषासंस्काररूपेण, भावसुरक्षारूपेण तथा सम्बन्धनिर्माणरूपेण विकसितं भवति-यथा लवकुशकथायां सीता, वाल्मीकिः तथा आश्रमीयपरिवेशः प्रत्यक्षतः दर्शयन्ति।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

८. १ भारतीयज्ञानपरम्परायां गर्भस्थशिशुना सह कथाकथनस्य निम्नलिखितानि सम्भाव्यानि फलानि कल्पितानि :

मातृमनसः शान्तिः, गर्भस्थशिशोः प्रति स्नेहसम्बन्धस्य निर्माणम्, शुभभावनानां विकासः, श्राव्यपरिवेशस्य सौम्यता, संस्कारयुक्तस्य पारिवारिकवातावरणस्य निर्माणम्, सत्य-धैर्य-करुणा-भक्त्यादिमूल्यानां परिचयः, जन्मोत्तरं मातृ-शिशुसम्बन्धस्य दृढता, तथा बालकस्य कथाश्रवणस्य, भाषासंवादस्य, भावनात्मकविकासस्य च आरम्भः। अत्र "फलम्" इति पदं चमत्कारिकरूपेण न ग्राह्यम्। कथां शृण्वतः गर्भस्थबालकस्य जन्मानन्तरं निश्चितरूपेण अमुकः गुणः भविष्यति इति न वक्तव्यम्; कथाकथनस्य प्रमुखं फलं मातुः प्रसन्नता, प्रेमपूर्णः संवादः, शान्तः ध्वनिपरिवेशः तथा परिवारस्य सकारात्मकभावना इति एव ग्राह्यम्।

संक्षेपेण, प्रह्लादकथा गर्भस्थश्रवणस्य तथा आध्यात्मिकसंस्कारस्य, अष्टावक्रकथा श्रवणस्य तथा ज्ञानग्रहणस्य, अभिमन्युकथा संवादक्रमस्य तथा ज्ञानोत्तरदायित्वस्य, वामदेवकथा गर्भस्थचैतन्यस्य, गर्भोपनिषद् गर्भस्थस्मृतेः कर्मबोधस्य मोक्षाभिलाषायाश्च, गान्धारीकथा गर्भकालीनभावपरिवेशस्य, सीता-लवकुशकथा च गर्भावस्थातः जन्मोत्तरपालनपर्यन्तस्य निरन्तरतायाः-एवं प्रत्येकम् आख्यानं भिन्नं भिन्नं आयामं प्रकाशयति। अतः भारतीयदृष्ट्या गर्भस्थबालकं प्रति कथाकथनं केवलं समयव्यतीतिः न, अपि तु मातृस्नेहस्य, पारिवारिकसंवादस्य, श्रवणसंस्कारस्य तथा आध्यात्मिकमूल्यपरम्परायाः प्रारम्भिकं माध्यमम्। गर्भिणीमाता यदा शान्तचित्तेन, प्रेमपूर्णेन स्वरेण, मङ्गलभावनया च बालकं सम्बोधयति, कथां कथयति, गीतं गायति वा, तदा गर्भस्थसत्त्वस्य कृते स्नेहमयः श्राव्यपरिवेशः निर्मीयते। एष एव भारतीयगर्भसंवादस्य विशिष्टः फलभावः-**कथा केवलं गर्भस्थशिशुं न संस्करोति, सा प्रथमं मातरं संस्करोति; माता संस्कृता चेत्, तस्याः भावः, वाणी, आचरणं च गर्भस्थशिशोः सत्त्वनस्य प्रथमं वातावरणं निर्माति।**

९.कथाचयनमानदण्डाः

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

कथाचयने अष्टौ मानदण्डाः विचारणीयाः। प्रथमम् अहिंसा भयराहित्यं च; भयशोकक्रोधवर्जनस्य आयुर्वेदीयोपदेशस्य अनुसारित्वात्। द्वितीयं संक्षेपः; अल्पा कथा मातुः श्रान्तिं न जनयति। तृतीयं लयः; गद्यपद्ययोः सरलः लयः मनः प्रसादयति। चतुर्थं सत्यकरुणाधैर्यादिमूल्ययुक्तता। पञ्चमं मातृभाषा; मातृभाषायां भावः सहजं सञ्चरति। षष्ठं मातुः रुचिः; दौहृदसम्मानस्य दृष्ट्या मातुः प्रियं कथाविषयम् उपेक्ष्य कथा न आरोप्या। सप्तमं पुनरावर्तनसामर्थ्यम्, यतः "आवृत्तिः सर्वशास्त्राणां बोधादपि गरीयसी" इति सुभाषितम् अष्टमं जन्मोत्तरं शिशोः संवादे उपयोगक्षमता।

१०. वाचनविधिः

स्थानं शुचि, शान्तं, सुखासनयुक्तं च स्यात्। कालः प्रतिदिनं समानः, चित्तप्रसन्नतायाः अवसरे च। वाचकस्य गुणाः पाणिनीयशिक्षायां निर्दिश्यन्ते :

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥ (पाणिनीयशिक्षा; श्लोक,32)

अतः वाचनं मधुरं, स्पष्टोच्चारणं, पदविभागसहितं, सुस्वरं, धैर्ययुक्तं, लयसम्पन्नं च भवेत्। अतिदीर्घं वाचनम् आयासजनकं भवति, अतः संयमः पालनीयः; भगवद्गीतायाम् अपि "युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु। युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥" (६.१७) इति परिमितता उपदिश्यते। कथाश्रवणानन्तरं माता कथायाः सारं मनसि स्मरेत्, कदाचित् गर्भं सम्बोध्य स्नेहेन ब्रूयात्।

११. आधुनिकशोधे प्रथमसहस्रदिवसानां परिभाषा तथा चतुःसोपानम्

आधुनिकशोधानुसार प्रथमसहस्रदिवसाः गर्भाधानात् आरभ्य बालकस्य द्वितीयजन्मदिनपर्यन्तं विस्तृतः कालखण्डः अस्ति लिखार और पाटिल इत्येतयोः शोधपत्रे प्रथमसहस्रदिवसाः एवं परिभाषिताः"Maternal nutrition needs to be addressed during pregnancy for the child's first 1,000 days of life, or roughly between conception and a child's second birthday" (Likhar and Patil)।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

अनेन स्पष्टं यत् गणना जन्मतः न, अपितु गर्भाधानतः आरभ्यतेइदमेव सिद्धान्तं गर्भोपनिषदः "अथ मात्राऽशितपीतनाडीसूत्रगतेन प्राण आप्यायते" (गर्भोपनिषद् ३) इति वचनेन समर्थितम्, यत्र गर्भाधानादेव सत्त्वस्य पोषणसातत्यं स्वीक्रियते।

चतुःसोपानविभाजनं ग्रन्थः एवं प्रस्तौति"(1) nine months to zero months: pregnancy; (2) zero to six months: breastfeeding; (3) six to 12 months: introduction of solid food; and (4) 12 months: transition to family diet" (Likhar and Patil)।

"प्रथमसहस्रदिवसः" इति आधुनिकः प्रयोगः गर्भाधानात् शिशोः द्विवर्षवयःपर्यन्तं कालखण्डं सूचयति। अस्मिन् कालखण्डे मस्तिष्कविकासः, पोषणम्, सुरक्षा, कर्तव्यपरायणा परिचर्या तथा आरम्भिकाधिगमः परस्परं सम्बद्धाः भवन्ति। विश्वस्वास्थ्यसंस्था (WHO) तथा यूनिसेफ्-संस्था (UNICEF) अनुसारं एषः कालः तीव्रस्य मस्तिष्कीयस्य, शारीरिकस्य च विकासस्य दृष्ट्या अत्यन्तं महत्त्वपूर्णः वर्तते; एतत् सर्वं केवलं चिकित्साविषयं न मत्वा स्वास्थ्य, पोषण, सुरक्षा, कर्तव्यपरायणा परिचर्या, प्रारम्भिकाधिगमः इति पञ्चविधसमेकितप्रारूपेण **(Nurturing Care Framework)** दृश्यते। यथा शोधे ब्लैक, मॉरीन एम. उक्तम्, **However, there is growing evidence that the next 1000 days, between the ages of 3 and 5, are also important years in which investment in early development should take place (Black & Merseth, 2018;). "The period from conception through the first five years of life is foundational for early childhood development**" (Black, Maureen M., et al. "Early Childhood Development Coming of Age: Science Through the Life Course." The Lancet, vol. 389, no. 10064, 2017, pp. 77–90.) भारते सद्यःकालीने राष्ट्रियपोषणविमर्शे अपि गर्भाधानतः द्विवर्षपर्यन्तस्य कालस्य "प्रथमसहस्रदिवसानाम्" प्राथमिकता दत्ता वर्तते।

आधुनिकशोधे प्रथमसहस्रदिवसाः गर्भाधानात् बालकस्य द्वितीयजन्मदिवसपर्यन्तं विस्तृतः अत्यन्तसंवेदनशीलः विकासकालः इति स्वीकृतः। किन्तु तस्य अन्तर्गतं कस्यां विशिष्टविकासावस्थायां काः कथाः कथनीयाः, कथावस्तुनः स्वरूपं कदा परिवर्तनीयम्, तथा मातृभाषा, स्वरः, लयः, पुनरावृत्तिः, नेत्रसम्पर्कः, स्पर्शः एवं संवादः इत्येतेषां प्रयोगः कदा कथं च करणीयः इति विषयः स्पष्टतया निर्दिष्टः न दृश्यते। अतः प्रस्तुतशोधे भारतीयपरम्परायां

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

गर्भस्थजीवस्य विकासे कथानां प्रयोगः केवलं मनोरञ्जनार्थं न, अपि तु संस्कार, भावविकास तथा मानसिकवातावरणनिर्माणस्य दृष्ट्या परिशीलनीयः अस्ति। अतः आधुनिकशोधेन प्रतिपादिते प्रथमसहस्रदिवससम्बद्धे संवेदनशीलविकासकाले भारतीयकथासाहित्यस्य भूमिका विशेषतया विचारणीयः भवति। गर्भकालात् आरभ्य शैशवपर्यन्तं कथानां माध्यमेन नीतिबोधः, भावसंस्कारः, आदर्शचरित्राणां परिचयः तथा स्नेहपूर्णस्य मानसिकपरिवेशस्य निर्माणं कथं सम्भवतिइति अस्य शोधस्य प्रमुखः विचारबिन्दुः भवति।

१२. प्रथमसहस्रदिवसानां कृते भारतीयसाहित्याधारिता व्यवहाररूपरेखा

भारतीयसाहित्याधारिता व्यवहाररूपरेखा चिकित्सकीयोपचारस्य विकल्पः न, अपितु परिवारकेन्द्रितस्य परिवेशं पोषयन् इत्यस्य सांस्कृतिकपूरकः रूपः भवितुम् अर्हति।

गर्भकाले मातुः पोषणम्, चिकित्सकीय पर्याप्तनिद्रा, तनावनियमनं तथा स्नेहपूर्णं पारिवारिकवातावरणं च प्राथमिकानि सन्ति। प्रतिदिनं शान्तं, सहजं तथा मातृप्रियं वाचनं राखितुं शक्यते संस्कृतस्तोत्रम्, श्लोकः, अथवा कुटुम्बप्रिया कथा। अत्र लक्ष्यं भ्रूणं "पाठं पाठयितुम्" न, अपितु मातरं शान्तां, स्थिरां तथा भावात्मकतया सम्बद्धाम् अनुभूतिं दातुं, परिचितं च श्रवणपरिवेशं निर्मातुम् अस्ति। गर्भकाले मातापितरौ स्वयं कथां पठतः,शृणुतः; जन्मानन्तरं सैव कथा चित्रैः, सङ्केतैः, प्रश्नोत्तरैः तथा पुनरावृत्त्या च पठ्यते "कथां कथय, शृणु, प्रत्युत्तरं देहि" इति संवादात्मकं संयुक्तपठनस्य आधुनिकसिद्धान्तैः सह अधिकं संगतम्। जन्मानन्तरं बालकस्य दृष्ट्या, मुखभावेन, गत्या तथा ध्वनिना च उत्तरे गानस्य गतिं परिवर्तयितुं शक्यते, यत् कर्तव्यपरायणःसंवादं वर्धयति। जन्मोत्तरे शून्यतः षण्मासपर्यन्तं मातृवाणी, त्वक्स्पर्शः, कर्तव्यपरायणःसंवादः तथा नेत्रसम्पर्कः प्राधान्येन योजनीयाः; षण्मासतः चतुर्विंशतिमासपर्यन्तं चित्रपुस्तकवाचनम्, संवादात्मककथा, पुनरावृत्तिः, वस्तुनामकरणं तथा बालस्य प्रतिक्रियायाः अनुसरणं च करणीयानि। सत्य, करुणा, धैर्य, सहकारिता तथा कृतज्ञता इत्यादीनां कथाभिः गीतैश्च व्यवहारिकं प्रदर्शनं कुटुम्बीयनैतिकपर्यावरणस्य आधारभूतम् अस्ति। मातृ/पितृवाण्याः उष्णता तथा प्रत्युत्तरशीलता च कस्यचिद् महार्घस्य "गर्भसंस्कारकार्यक्रमस्य" अपेक्षया अधिकं मूलभूतं मन्तव्यम्।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

१२.१ प्रस्तुतं मौलिकानुसन्धानम् : प्रथमसहस्रदिवसेषु कथाश्रवणक्रमः (शास्त्राधारितसन्दर्भसहितम्)

अनुसन्धानस्य इतिहासे प्रथमतया एव, प्राचीनभारतीयवाङ्मयस्य आधुनिकबालविकासविज्ञानस्य च समन्वयेन एतादृशः अभिनवः प्रयासः विधीयते। अस्माकम् अस्मिन् शोधकार्ये गर्भावस्थातः आरभ्य बाल्यकालस्य प्रारम्भिक-द्विवर्षपर्यन्तं (प्रथमसहस्रदिवसेषु) शिशूनां समग्रविकासाय व्यावहारिक मानदण्डानां निरूपणम् अस्ति। एतत् नवीनं कालजयी च संशोधनं सम्प्रति यावत् अप्रकाशितं वर्तते, यत् परम्परागतज्ञानम् आधुनिकपरिप्रेक्ष्ये दृढतया प्रस्थापयति।

सोपानम् १: गर्भावस्था तथा मस्तिष्कविकासः (मातृशान्तिकालः; नवमासात् जन्मपर्यन्तम्)

अस्मिन् सोपाने माता शारीरिकं मानसिकं च शान्तिम् अपेक्षते, गर्भस्थः शिशुः च मातृहृदयस्पन्दनं, तस्याः स्वरं, परिचितध्वनींश्च एव अनुभवति। बाह्यजगतः सह तस्य सम्बन्धः केवलं मातुः माध्यमेन भवति। एतादृश्यां स्थित्यां शान्ताः, मङ्गलमय्यः, अभयाः च कथाः अत्यन्तं फलदायिन्यः सन्ति, यतः ताः मातुः चित्तं स्थिरीकुर्वन्ति, तस्याः भावनाः प्रसन्नाः कुर्वन्ति, तथा गर्भस्थशिशोः कृते एकं परिचितं, सुरक्षितं च श्रवणसंस्कारं निर्मान्ति। अयम् एव संस्कारः जन्मानन्तरम् अपि तं शान्तिं स्मारयति। आदौ माता एव संस्कार्या।

"सा भावयित्री भावयितव्या भवति। तं स्त्री गर्भं बिभर्ति।

सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति॥"

(ऐतरेयोपनिषद्, चतुर्थोऽध्यायः, श्लोकः ३;)

लोके उपकार-प्रत्युपकारयोः नियमानुसारं या स्त्री पत्युः आत्मस्वरूपं गर्भं स्वकुक्षौ पोषयति, सा भार्या पत्या अपि अवश्यं पोषणीया रक्षणीया च भवति। स्त्री तं गर्भं शरीरे धारयति; ततः परं पिता जन्मनः पूर्वं पश्चात् च जातकर्मादिभिः संस्कारैः तस्य कुमारस्य निरन्तरं पालनं संरक्षणं च करोति। गर्भिण्याः परिचर्या कुटुम्बस्य कर्तव्यं मन्यते।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

प्रथमेषु मासेषु गर्भस्य श्रवणेन्द्रियं न परिपक्वं भवति, अतः तदा कथा मातुः चित्तशान्त्यर्थं प्रवर्तते, न तु गर्भस्य ज्ञानार्थम्। षष्ठात् सप्तमाच्च मासात् परं श्रवणप्रतिक्रिया स्पष्टतरा भवति। तृतीये त्रैमासिके एका "मूलकथा" प्रतिदिनं समाने समये समेन स्वरेण च श्राव्यते; जन्मानन्तरं सैव कथा पुनः श्राव्यते।

शोधपत्रं गर्भस्थमस्तिष्कविकासस्य वेगं विशेषरूपेण निर्दिशति:

> *"Children's brains can create 1,000 new neural connections every second throughout this time. The connections that a three-year-old brain forms provide the foundation for their future because it is twice as busy as an adult's brain"* (Likhar and Patil)।

कथाः

1. ऋषिनारदाश्रमे कयाधोः शान्तः प्रसङ्गः, श्रीमद्भागवतम् ७.७
2. प्रह्लादचरित्रम्: भागवतपुराणम्, स्कन्धः ७
3. शुकदेवजन्मकथा: महाभारतम्/भागवतपुराणम्
4. रामजन्मवर्णनम्: वाल्मीकिरामायणम्, बालकाण्डः
5. सीताजन्म: वाल्मीकिरामायणम्, बालकाण्डः
6. मार्कण्डेयचरित्रम्: महाभारतम्, वनपर्व
7. परीक्षितरक्षा (उत्तरागर्भे कृष्णरक्षा): भागवतपुराणम्, स्कन्धः १
8. हितोपदेशे मित्रलाभप्रकरणे कपोतानां जालमोचनकथा (ऐक्यस्य उपदेशः)
9. शशजातकम् (जातकसङ्ख्या ३१६; करुणायाः कथा)

माता प्रतिदिनं दश-पञ्चदशनिमेषान् शान्ते स्थाने कथां पठेत् शृणुयाद् वा इति विधिः। **भयजनकाः अंशाः वर्ज्याः इति निर्देशः।**

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

गर्भकाले वर्ज्यानि

याः कथाः भय-हिंसाप्रधानाः, शोकप्रधानाः, वा तीव्रविषादजनिकाः सन्ति, ताः गर्भकाले सर्वथा वर्ज्याः। यथा अभिमन्योः चक्रव्यूहे वधः (महाभारतम्, द्रोणपर्व), द्रौपद्याः सभायाम् अपमानप्रसङ्गः (महाभारतम्, सभापर्व), हिरण्यकशिपोः क्रौर्यवर्णनम् (भागवतपुराणम्, स्कन्धः ७) इत्यादीनि। एताः कथाः मातुः मनसि भयम्, दुःखम्, उद्वेगं वा जनयितुम् अर्हन्ति, यत् पूर्वं यथा निर्दिष्टम् (तस्याः चित्तशान्तिं भङ्क्त्वा) गर्भस्थशिशोः कृते अपि अनुपयुक्तं भवति।

एतद्विषये इदम् अपि स्पष्टं कर्तव्यम् यत् अभिमन्यु-, अष्टावक्र-, गान्धारीसम्बद्धाः कथाः (याः गर्भस्थज्ञानस्य दृष्टान्तरूपेण प्रायः उल्लिख्यन्ते) अस्मिन् शोधे केवलं विश्लेषणार्थम् एव रक्षिताः सन्ति; ताः मातुः प्रत्यक्षश्रावणाय न अनुशस्यन्ते, यतः तासु अपि हिंसा, शापः, वियोगः वा अन्तर्भूतः अस्ति। शोधविश्लेषणस्य प्रयोजनं (गर्भस्थज्ञानस्य साम्यर्थ्यस्य वा सीमायाः निरूपणम्) मातुः दैनन्दिनकथाश्रवणाभ्यासात् पृथक् एव मन्तव्यम्।

सोपानम् २: जन्मतः षण्मासं यावत् (स्तन्यपानकालः)

अस्मिन् सोपाने नवजातः शिशुः मातुः स्तन्यपानेन, त्वक्स्पर्शेन, स्वरेण च एव सुरक्षितः अनुभवति; तस्य दृष्टिः अद्यापि अस्पष्टा भवति, किन्तु श्रवणं मातृस्वरं प्रति विशेषतः संवेदनशीलं भवति। माता स्वयमपि प्रसवोत्तरं शारीरिकं मानसिकं च पुनःस्थापनम् अनुभवति। अतः मृदुस्वरा, लोरीसदृशी, लयबद्धा च वात्सल्यपूर्णा कथा अत्यन्तं फलदायिनी भवति, यतः सा उभयोः मातृशिशुयोः स्नेहबन्धं दृढीकरोति तथा शिशोः कृते नियमितं, प्रत्याशनीयं च वातावरणं निर्माति।

ग्रन्थः स्तन्यस्य अद्वितीयतां स्पष्टं वदति:

> ***"Breast milk provides a newborn with the ideal dietary foundation for the first six months of life because it is specially formulated to meet the needs"*** **(Likhar and Patil)।**

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

कथाः

1. यशोदया बालकृष्णस्य हिण्डोलदोलनम्: भागवतपुराणम्, दशमस्कन्धः
2. सूरदासेन वर्णितः कृष्णस्य दोलिकादोलनप्रसङ्गः, सूरसागरः,बाल-लीला
3. कौशल्यया शिशुरामस्य हिण्डोलशयनम्: वाल्मीकिरामायणम्/रामचरितमानसम्, बालकाण्डः
4. अयोध्यायां रामजन्मनि मङ्गलगीतवातावरणम्: रामचरितमानसम्, बालकाण्डः, तुलसीदासः
5. देवकीवसुदेवयोः नवजातकृष्णदर्शनस्नेहप्रसङ्गः, भागवतपुराणम्, दशमस्कन्धः
6. पार्वत्या बालगणेशस्य लालनम्: शिवपुराणम्
7. उर्मिलालक्ष्मणयोः जन्मशैशववर्णनम्: वाल्मीकिरामायणम्, बालकाण्डः
8. यशोदया कृष्णस्य मृदुकरस्पर्शेन निद्राकरणम्: भागवतपुराणम्, दशमस्कन्धः
9. अञ्जनया बालहनुमतः दुलारः (जन्मोत्तरप्रसङ्गः): वाल्मीकिरामायणम्, किष्किन्धाकाण्डः ४.६५ (प्रसङ्गपूर्वभागः;)
10. सुभद्रया नवजाताभिमन्योः प्रति वात्सल्यम्: महाभारतम्, आदिपर्व

सोपानम् ३: षण्मासात् द्वादशमासपर्यन्तम् (अन्नप्राशनम्प्रारम्भकालः; ग्रन्थ-पात्राधारिताः पुनरावृत्तिकथाः)

अस्मिन् सोपाने शिशुः **उपवेष्टुम्**, वस्तूनि स्वहस्ताभ्यां **गृहीतुम्**, प्रथमशब्दान् वा ध्वनीन् **उच्चारयितुम्** च आरभते। **अन्नप्राशनस्य** प्रारम्भेन सह नूतनाः स्वादानुभवाः, नूतनाश्च अनुभवाः तस्य जीवने प्रविशन्ति। माता अस्मिन् काले दैनन्दिनजीवनक्रमे स्थैर्यं स्थापयति तथा शिशुं नूतनविषयेषु क्रमशः परिचाययति। अतः लघ्व्यः, लयबद्धाः, चित्रात्मकाः पुनरावर्तनीयाश्च कथाः अत्यन्तं **उपकारिण्यः** भवन्ति; यतः ताः शिशोः परिचितस्वराणां तथा शब्दानां प्रत्याशां वर्धयन्ति, ध्यानं स्थिरीकुर्वन्ति, भाषाविकासस्य च दृढम् आधारं निर्मान्ति। ग्रन्थे तृतीयसोपाने (षण्मासतः द्वादशमासपर्यन्तम्) अन्नप्राशनस्य महत्त्वं निर्दिष्टम् अस्ति।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

> ***"the majority of the child's calories and nutrients come from breast milk or formula. Instead, solid foods should be viewed as bonus food"*** **(Likhar and Patil)**

इदं सूचयति यत् नूतनाहारस्य प्रवेशः क्रमिकः, परीक्षात्मकः च भवितव्यः। इयमेव क्रमिकता कथाकथनयोजनायाः सोपानशैल्याः अपि समर्थिका भवितुम् अर्हति।

प्रह्लादस्य नारदोपदेशांशः (श्रीमद्भागवतम् ७.६–७.७); आरम्भः "कौमार आचरेत्प्राज्ञः" (७.६.१) इत्यनेन, कथनं ७.७.१ पर्यन्तं सामान्यतः शक्यम्। ७.५ तथा ७.८ अध्याययोः यातनावर्णनं वर्ज्यम्। अथवा सङ्क्षेपरामायणम् (वाल्मीकिरामायणम्, बालकाण्डम्, प्रथमः सर्गः), यत् लघु, लयसम्पन्नं, पुनरावर्तनीयं च; अथवा कुटुम्बपरम्परागता मातृभाषीया काचित् कथा।

अन्तिमेषु षट्-दशसप्ताहेषु प्रतिदिनं समाने समये मातृभाषया कथनम् इति विधिः। तेन सह पुष्प-नदी-पर्वत-पक्षि-वर्षा-चन्द्रादीनां प्रकृतिवर्णनम् अपि करणीयम्।

कथाः

1. बालहनुमता सूर्यस्य फलभ्रमेण निगरणम्: वाल्मीकिरामायणम्, किष्किन्धाकाण्डः ४.६५.१९ ( )
2. बालकृष्णस्य नवनीतचौर्यम् (दैनन्दिनपुनरावृत्तलीला): भागवतपुराणम्, दशमस्कन्धः
3. बालगणेशाय प्रतिदेवतया मोदकाशीर्वादप्रसङ्गः, गणेशपुराणम्
4. बालध्रुवस्य "अहमपि पितुः क्रोडे उपविशेयम्" इति प्रसङ्गः, भागवतपुराणम्, स्कन्धः ४
5. बालकृष्णेन मृत्तिकाभक्षणे यशोदायै मुखे विश्वरूपदर्शनम् (सरलदृश्यरूपेण वर्णनीया; दार्शनिकतत्त्वं वर्जनीयम्): भागवतपुराणम्, दशमस्कन्धः
6. बालकार्तिकेयगणेशयोः पृथ्वीपरिक्रमास्पर्धा (सरलीकृता, पुनरावृत्ततर्कशैली): शिवपुराणम्/स्कन्दपुराणम्
7. गिजुभाईबधेकाकृता "आम्रभ्रातः निम्बभ्रातः" (मूलशीर्षकम्: अमवा भैया नीमवा भैया): भारतीयबालसाहित्यकारः, भारतीयग्राम्यपात्राणि

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

8. गिजुभाईबधेकाकृता "कथां कथयामि भ्रातः" (मूलशीर्षकम्: कहानी कहूं भैया): ISBN · 978-81-7309-3
9. गिजुभाईबधेकाकृता "तडतड तुम्बी तडन्तडा": ध्वन्यात्मकपुनरावृत्तिः

सोपानम् ४: द्वादशमासात् द्वितीयजन्मदिवसपर्यन्तम् (परिवाराहारसङ्क्रमणकालः)

अस्मिन् सोपाने बालकः चलितुम्, सरलानि वाक्यानि उच्चारयितुम्, वस्तूनि नामतः ज्ञातुं च आरभते; कुतूहलं, जिज्ञासा, अनुकरणप्रवृत्तिश्च तस्मिन् प्रबलतरे भवतः। सः इदानीं परिवारस्य साधारणाहारे, संवादे च सम्मिलितो भवति। अतः चित्रयुक्ताः, संवादात्मकाः, स्पष्टनैतिकमूल्ययुक्ताः च सरलकथाः अत्यन्तं फलदायिन्यः सन्ति, यतः ताः बालस्य भाषां, स्मृतिं, नैतिकप्रज्ञां च क्रमशः संवर्धयन्ति।

चतुर्थसोपाने (द्वादशमासादूर्ध्वम्) ग्रन्थः बालकस्य अन्नाप्रियताविषये महत्त्वपूर्णं सुझावं ददाति:

> *"It can be essential to try a food type again with different meals before a youngster will accept it, often eight to 15 times"* (Likhar and Patil)।

अत्र पुनरावृत्तेः सिद्धान्तः स्पष्टः। कोऽपि नूतनविषयः (आहारः वा कथा वा) एकवारमात्रेण न स्वीक्रियते, अपि तु बहुवारं सुपरिचितरूपेण प्रस्तुतः सन्नेव आत्मसात् भवति। इदमेव सिद्धान्तं कथाकथनयोजनायाम् अपि प्रयोक्तुं शक्यते: एकैव कथा भिन्नैः रूपैः (गीतरूपेण, अभिनयरूपेण, चित्ररूपेण) पुनः पुनः प्रस्तोतव्या।

संवादात्मकं कथनम् ("कथां कथय, शृणु, प्रत्युत्तरं देहि" इति क्रमेण) साधनीयम्। हनुमतः बाल्यकथा (वाल्मीकिरामायणम्, किष्किन्धाकाण्डस्य सर्गः ६६; उत्तरकाण्डम्, सर्गौ ३५–३६); पञ्चतन्त्रस्य लघ्व्यः पशुकथाः; गणेशसम्बद्धाः पौराणिक-लोककथाः; गिजुभाई-बधेकायाः बालकथाः; मातृभाषीयाः लोककथाः। एतासु विषयाः सत्यं, करुणा, धैर्यं, सहकारिता, कृतज्ञता च भवन्ति। अत्र स्वरः, लयः, स्पर्शः च समानरूपेण महत्त्वपूर्णाः। सैव मूलकथा मृदुना स्वरेण मन्दगत्या च स्तन्यपानसमये विश्रान्तिसमये च श्राव्या। श्रीकृष्णबाललीला (श्रीमद्भागवतम् १०.८; सङ्क्षिप्तखण्डशः) अस्यां वयसि सहजा भवति, यतः नायकः शिशुः एव। नेत्रसम्पर्कः त्वक्स्पर्शश्च सर्वदा वर्धनीयौ।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

चित्रयुक्ताः लघ्व्यः पुनरावर्तनीयाः कथाः, वस्तूनां नामोच्चारणं च करणीयम्। पञ्चतन्त्रजातकयोः पशुपक्षिकथाः; कृष्णयशोदाप्रसङ्गः (श्रीमद्भागवतम् १०.९, दामोदरलीला)। शिशोः प्रतिक्रियां लक्षयित्वा कथनगतिः परिवर्तनीया।

कथाः

1. सिंहः शशकश्च: पञ्चतन्त्रम्, तन्त्रम् १
2. शशकजातकम्: जातककथाः, अनु. भदन्तानन्दकौसल्यायनः
3. वानरः कुम्भीरश्च: पञ्चतन्त्रम्, तन्त्रम् ४
4. कच्छपः हंसद्वयं च: पञ्चतन्त्रम्, तन्त्रम् १
5. कृतज्ञमूषकः सिंहश्च: पञ्चतन्त्रम्
6. गजयूथं मूषकश्च: पञ्चतन्त्रम्/जातकम्
7. बिडालस्य कण्ठे घण्टा: पञ्चतन्त्रम्, तन्त्रम् ३
8. गिजुभाईबधेकाकृता "कथां कथयामि भ्रातः" इत्यस्याः नीतिकथा

टिप्पणी: बेतालपञ्चविंशतेः तथा तेनालीरामस्य कथाः (यासु मृतशरीरसम्बद्धाः प्रसङ्गाः, राजदरबारीयजटिलपहेल्यः वा सन्ति) सामान्यतः त्रिवर्षाधिकवयस्कानां बालकानां कृते उपयुक्ताः भवन्ति, अतः ताः अस्मात् सोपानात् निष्कासिताः; अग्रिमे विकासचरणे (द्वितीयसहस्रदिवसे) ताः पुनः प्रयोक्तुं शक्यन्ते।

कथाकथनस्य पितृकर्तव्यं लोकसन्ततिश्च

ऐतरेयोपनिषद् द्वितीयजन्मस्य विवेचनं कुर्वन् पितृकर्तव्यस्य व्यापकं स्वरूपं दर्शयति। पिता जन्मनः पूर्वमपि कुमारस्य भावनां करोति, जन्मानन्तरं च तस्य पालनं पोषणं संवर्धनं च करोति। अतः बालकस्य पालनं केवलं व्यक्तिगतं वात्सल्यकर्म न, अपि तु लोकसन्ततेः संरक्षणस्य साधनम् इति उपनिषदिकी दृष्टिः।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

"आत्मानमेव तद्भावयति, एषां लोकानां सन्तत्या" इत्यनेन बालकस्य विकासः व्यक्तिसत्त्वस्य सीमाम् अतिक्रम्य सामाजिक-सांस्कृतिकपरम्परायाः सातत्येन सम्बध्यते। पिता पुत्रे स्वात्मन एव सातत्यं पश्यति; पुत्रस्य पालनद्वारा लोकानां सन्ततिं च धारयति। एवं द्वितीयं जन्म पारिवारिककर्तव्येन, सामाजिकदायित्वेन, लोकपरम्परायाः संरक्षणेन च सम्बद्धं भवति।

तृतीयं जन्म पुनर्जन्मदृष्टिश्च

अस्यैव जन्मपरम्परायाः तृतीयं सोपानं पुनर्जन्मदृष्ट्या निरूप्यते:

सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते।

अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति।

स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म॥

(ऐतरेयोपनिषत् २.४.४)

अत्र पुत्रः केवलं वंशपरम्परायाः वाहकः न, अपि तु पितृकर्मपरम्परायाः प्रतिनिधिरूपेण निरूपितः। एतेन उपनिषद् जन्म शरीरपरिवर्तनमात्रेण न सीमयति; जन्म, कर्म, कर्तव्य, लोकसन्ततिः तथा पुनर्जन्म, एतेषां सर्वेषां परस्परसम्बन्धः स्थापितः इति ज्ञायते।

१३. गर्भकाले वर्ज्यानि

अभिमन्युवधः, द्रौपद्याः अपमानप्रसङ्गः, हिरण्यकशिपोः क्रौर्यवर्णनम् इत्यादीनि भयहिंसाप्रधानानि। अभिमन्य,अष्टावक्,गान्धारीकथाः शोधविश्लेषणाय रक्ष्यन्ते, मात्रे श्रावणीयतया न। गर्भोपनिषदः नवममासीयं पूर्वजातिस्मरणवचनं दार्शनिकं वर्णनं, न तु मात्रे कथनीया कथा।

१३. **१ मातुः भयक्रोधशोकयोः गर्भे दुष्प्रभावं दर्शयन्त्यः कथाः**

१. अम्बिका-अम्बालिकोपाख्यानम् - महाभारते आदिपर्वणि वर्णितं यत् व्यासेन नियोगविधिना सह गमनकाले अम्बिका भयात् नेत्रे निमील्य स्थिता, अतः तस्याः पुत्रः धृतराष्ट्रः अन्धः अजायत।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

अम्बालिका च भयेन विवर्णमुखी अभवत्, तस्याश्च पुत्रः पाण्डुः पाण्डुवर्णः अजायत। इयं कथा सुश्रुतोक्तस्य "भयात् रक्षणीया गर्भिणी" इति विधेः प्रत्यक्षं समर्थनम् - मातुः क्षणिकोऽपि भयभावः गर्भस्थसत्त्वस्य लक्षणेषु स्थायिप्रभावं जनयतीति अत्र प्रतिपाद्यते।

२. गान्धार्याः गर्भोपाख्यानम् - व्यासोक्तेन वरेण गान्धारी द्विवर्षपर्यन्तं गर्भं धृतवती। कुन्त्याः युधिष्ठिरजन्मवार्तां श्रुत्वा शोकाक्रान्ता क्रोधाविष्टा च सती स्वोदरं ताडितवती, येन मांसपिण्डः पतितः। इयं कथा तीव्रशोकक्रोधयोः गर्भपरिणामे कियत् दुष्प्रभावः भवति इति नाटकीयरूपेण दर्शयति - चरकोक्तस्य "अहिताभ्यां न उपचरेत्" इति निषेधस्य समर्थनम्।

(ख) मातुः सकारात्मकभावनायाः गर्भे सुप्रभावं दर्शयन्त्यः कथाः

१. कुन्त्याः मन्त्रध्यानोपाख्यानम् - कुन्ती दुर्वाससा दत्तेन मन्त्रेण देवताध्यानपूर्वकं यान् पुत्रान् प्रापत् - धर्म-वायु-इन्द्रदेवताध्यानजन्यान् युधिष्ठिर-भीम-अर्जुनान् - तेषु प्रत्येकं देवतागुणः प्रतिफलितः इति परम्परा वर्णयति। इयं कथा मातुः ध्यानभावस्य, प्रसन्नचित्तत्वस्य च गर्भस्थसत्त्वे प्रतिफलनम् इति सिद्धान्तं समर्थयति - चरकोक्तस्य "प्रिय" पक्षस्य दृष्टान्तः।

२. प्रह्लादोपाख्यानस्य पुनःसन्दर्भः - कयाधुः गर्भावस्थायां नारदमुखात् भक्तितत्त्वं शुश्राव। नारदेन कयाध्वाः रक्षार्थं तस्याः चित्तं प्रसन्नं भयरहितं च कृतम् - असुरगणैः पीड्यमानाया अपि तस्याः मनःशान्तिः एव प्रह्लादस्य भक्तिसंस्कारस्य आधारः अभवत्। इदं द्वैहृदय्यसिद्धान्तस्य पूर्णं समर्थनम् - मातुः चित्तवृत्तिः एव गर्भस्थसत्त्वस्य संस्कारनिर्माणे हेतुः भवति।

एवं अम्बिका-अम्बालिका-गान्धार्युपाख्यानानि नकारात्मकभावानां गर्भे दुष्प्रभावं, कुन्ती-प्रह्लादोपाख्याने च सकारात्मकभावानां सुप्रभावं प्रतिपादयन्ति। उभयमपि चरक-सुश्रुतयोः "प्रियहित" "द्वैहृदय्य" सिद्धान्तयोः साहित्यिकं समर्थनं भवति, येन शोधशीर्षकस्थं "शिशुविकासे कथाश्रवणस्य भूमिका" इति दावः शास्त्र-आयुर्वेद-साहित्यत्रयेण सुदृढः सिध्यति।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

१५. शोधसीमाः

अस्य अध्ययनस्य प्रमुखा सीमा स्रोतवैविध्यं तथा प्रमाणस्तरभेदः अस्ति। उपनिषद्, वेद, पुराण तथा महाकाव्याः धार्मिक, दार्शनिक, सांस्कृतिकग्रन्थाः सन्ति; आधुनिकाः **व्यवस्थितसमीक्षाः अनुभवजन्यप्रमाणानि च** इत्यस्य मानदण्डान् अनुसरन्ति; उभयोः प्रत्यक्षसमतुल्यता सम्भवति न। प्राचीनग्रन्थानां कालनिर्धारणस्य, पाठभेदस्य तथा भाष्यपरम्परायाश्च कारणात् तेषां कथनानि आधुनिकवैज्ञानिकचरेषु प्रत्यक्षतया रूपान्तरयितुं न शक्यन्ते।

१७. निष्कर्षः

एतस्मिन् शोधे स्पष्टं जातं यत् प्रथमसहस्रदिवसेषु कथाश्रवणस्य लाभः न कस्याश्चिदपि कथायाः श्रवणमात्रेण प्राप्यते, अपि तु शिशोः वर्तमानविकासावस्थायाः अनुरूपां कथां चित्वा श्रावयित्वा एव सः लाभः सिद्ध्यति। एषः एव अस्य शोधस्य केन्द्रीयः निष्कर्षः।

यथा आधुनिकपोषणविज्ञानं दर्शयति यत् बालकस्य आहारः तस्य वयसे अनुरूपः भवितव्यः (गर्भकाले मातुः पोषणम्, जन्मतः षण्मासं यावत् स्तन्यम् एव, तदनन्तरं क्रमेण हारः, द्वादशमासादूर्ध्वं परिवाराहारः), तथैव कथाश्रवणम् अपि चतुर्षु सोपानेषु क्रमशः योजनीयम्। आहारे यथा असामयिकं वस्तु शिशोः अपकारं करोति, तथैव कथायामपि असामयिकः विषयः उपकाराय न भवति।

गर्भावस्थायां भयजनकाः, जटिलाः वा प्रसङ्गाः वर्ज्याः; केवलं शान्ताः, मङ्गलमय्यः कथाः श्राव्याः, यतः तत्र लक्ष्यं मातुः चित्तशान्तिः, न तु गर्भस्य ज्ञानार्जनम्। जन्मतः षण्मासं यावत् मृदुस्वरलोरीसदृश्यः वात्सल्यपूर्णाः कथाः एव उपयुक्ताः; गम्भीरविषयाः (यथा नचिकेतोपाख्यानं, सावित्र्युपाख्यानं वा) यद्यपि शास्त्रीयदृष्ट्या मूल्यवन्तः सन्ति, तथापि अस्यां वयसि अनुपयुक्ताः, यतः शिशुः तान् ग्रहीतुं शारीरिकमानसिकरूपेण अद्यापि असमर्थः। षण्मासात् द्वादशमासपर्यन्तं लघ्व्यः, पुनरावर्तनीयाः कथाः फलप्रदाः; द्वादशमासादूर्ध्वं संवादात्मकाः, स्पष्टनैतिकमूल्ययुक्ताः सरलकथाः उपयुक्ताः भवन्ति, किन्तु बेतालपञ्चविंशतिसदृश्यः मृत्युसम्बद्धाः, जटिलाः च कथाः अद्यापि अग्रिमचरणाय एव संरक्ष्याः।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

अतः भारतीयसाहित्यपरम्परा च आधुनिकपोषणविज्ञानं च एकस्मिन् एव सिद्धान्ते संगच्छेते: यत् किमपि उपकारकं वस्तु (आहारः वा कथा वा) तदा एव सम्यक् फलं ददाति, यदा तत् प्राप्तुः अवस्थानुरूपं, क्रमबद्धं, पुनरावृत्तं च प्रस्तूयते। अनुपयुक्ता कथा, भवेत् सा शास्त्रीयदृष्ट्या कियती अपि श्रेष्ठा, शिशोः वर्तमानविकासाय उपकारं न करोति, अपि तु कदाचित् भ्रमं, भयं वा जनयितुम् अर्हति।

एतेन शोधेन इदम् अपि सिद्ध्यति यत् पितरौ उभौ (न केवला माता) कथाकथने भागिनौ स्तः, यतः ऐतरेयोपनिषदनुसारं पितुः कर्तव्यम् अपि जन्मनः पूर्वम् आरभ्य निरन्तरं वर्तते। तथा च कथाकथनं न केवलं मनोरञ्जनं, अपि तु लोकसन्ततेः संरक्षणस्य, सांस्कृतिकमूल्यानां हस्तान्तरणस्य च साधनम् इति उपनिषदिकी दृष्टिः अत्र सार्थकतां लभते।

अतः अन्तिमप्रतिपादनम् इदं न यत् प्रत्येकः मन्त्रः गर्भस्थशिशोः बुद्धिं निश्चितरूपेण वर्धयति, न च प्रत्येकं पुराणकथा जैविकसत्यस्य प्रमाणम्। अपि तु भारतीयसाहित्यस्य महत्त्वं तत्र अस्ति यत् सः गर्भावस्थां तथा शैशवं "मानवनिर्माणस्य सम्बन्धात्मक, सांस्कृतिक, आरम्भः" इति पश्यति; एतस्य प्रभावः प्रायः मातृकेन्द्रितेन, सम्बन्धाधारितेन च मार्गेण प्रवर्तते, न तु कस्यचित् एकस्य मन्त्रस्य वा कथायाः चमत्कारिकेण प्रत्यक्षकारणत्वेन। आधुनिकबालमनोविज्ञानेन, प्रमाणाधारितशोधेन च सह भारतीयज्ञानपरम्परायाः प्रामाणिकः, विनम्रश्च समन्वयः एव प्रथमसहस्रदिवसस्य समग्रविकासविमर्शं अधिकं प्रमाणनिष्ठं, सांस्कृतिकरूपेण प्रासङ्गिकं तथा मानवीयं करोति, विकसितभारत्, २०४७, स्वप्नस्य साकारीकरणं च संभावयितुं शक्नोति।

१८. अनुसन्धाननैतिकी टिप्पणी

अस्मिन् शोधे प्राचीनग्रन्थीयवाक्यानाम् आधुनिकवैज्ञानिकसाक्ष्यैः सह तुलना कृता अस्ति; तथापि तयोः प्रमाणश्रेणिः समानः इति न मन्यते। धार्मिकः मन्त्रः, कथा वा लोरी इत्येतत् चिकित्सायाः, औषधेः, Obstetric care अथवा Developmental diagnosis इत्यस्य विकल्परूपेण प्रस्तुतं न कर्तव्यम्। गर्भिण्याः तथा शिशोः हितं सर्वोपरि स्थापनीयम्। आधुनिकचिकित्सापरामर्शः आवश्यकतानुसारम् अनिवार्यः।

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

सन्दर्भग्रन्थसूची

A. वैदिक / उपनिषद् / दर्शन

1. Mahatma Narayan, Swami, commentator. *Upanishad Rahasyam*. Vijay Kumar Govindram Hasanand, 2018, pp. 349–54.
2. Atharvaveda. Sharma, Ganga Sahay. Sanskrit Sahitya Prakashan, 2015. Print.
3. *Dash, Durga Prasad. Paippalada's Garbhopanishad (A Brief Treatise on Embryo and Fetus). Chaukhambha Orientalia, 2006. Print.*
4. *shadi Nau Upanishad (Shankarbhashya Hindi Anuvad Sahit). Gita Press, Gorakhpur, 2022. Print.*
5. Goyandka, Jayadayal, commentator. *Chandogya Upanishad*. Gita Press, 2018. Print.
6. Goyandka, Jayadayal, commentator. *Kathopanishad*. Gita Press, 2019. Print.
7. Griffith, Ralph T. H., translator. *The Hymns of the Samaveda*. Chowkhamba Sanskrit Series Office, 1963 (4th ed.). Print.
8. Mahatma Narayan, Swami, commentator. *Upanishad Rahasyam*. Vijay Kumar Govindram Hasanand, 2018, pp. 349–54. Print.
9. Patanjali. *Sankhya Yogadarsana or Yogadarsana of Patanjali*. Edited by Gosvami Damodara Sastri, Chaukhambha Sanskrit Bhawan, 2018. Print. (समाधिपाद 1.27–28)
10. *Rig-Veda-Samhita*. Vol. 1, Chowkhamba Sanskrit Series Office, 1966. Print.
11. Shastri, Rakesh, translator. *Taittiriya Upanishad*. Chaukhambha Orientalia, 2024. Print.

B. स्मृति / आयुर्वेद

12. Bhishagratna, Kaviraj Kunjalal, translator. *An English Translation of the Sushruta Samhita*. 3 vols., Chowkhamba Sanskrit Series Office, 1996 (5th ed., Sutra-sthana). Print.
13. Pandey, Kashinath, and Gorakhnath Chaturvedi. *Charaka Samhita*. Chaukhambha Bharati Academy, 2019. Print.

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

14. Sharma, Pankaj, et al. "A Comparative Exploration of Garbhopanishad in the Purview of the Brihatrayee: A Review." *International Journal of Research in Ayurveda and Pharmacy*, vol. 15, no. 5, 2024, pp. 155–161. Print.
15. Sharma, P. V., translator. *Charaka Samhita*. Vol. 1, Chaukhambha Orientalia, 2014. Sharira Sthana, ch. 4, verse 15. Print.
16. Shastri, Hargovind. *Manusmriti*. Chaukhambha Sanskrit Bhawan, 2024. Print.

C. पुराण / इतिहास

17. Gita Press. *Markandeya Purana*. With Hindi commentary, Gita Press, 2024. Print.
18. Gita Press. *Shrimad Bhagavata Mahapurana*. Translated by C. L. Goswami, vols. 1–2, Gita Press, 2021. Print. (स्कन्ध 4.8–12; 7.5–7.8; 10.8–10.9)
19. Goyandka, Hardayal, editor. *Mahabharata*. Gita Press, Gorakhpur, 2016. Print.
20. Goyandka, Jayadayal. *Shrimad Bhagavad Gita (Tattvavivechani)*. Gita Press, Gorakhpur, Print. (गीता 6.17)
21. *Mahabharata*. Translated by Ramnarayan Dutt Shastri Pandey, vols. 1–2, Gita Press, 2019. Print.
22. Valmiki. *Shrimad Valmiki Ramayana*. Translated by Dwarka Prasad Sharma, vols. 1–2, Gita Press, 2020. Print.

D. नीति / कथा / अन्य

23. *The jataka: Together with Its Commentary*. Edited by V. Fausboll, translated by T. W. Rhys Davids, vol. 3, Motilal Banarsidass, 2015. Print.
24. Narayana. *Hitopadeśa*. Edited by M. R. Kale, Motilal Banarsidass, 2016. Print.
25. Dr. Balagovind Jha,Panini Shiksha Sopanam. Chaukhamba Surbharati Prakashan ,. (श्लोक 32)
26. Viṣṇuśarmā. *Pañcatantram*. Translated by Shyamacharan Pandey, Motilal Banarsidass, 2018. Print.

E. आधुनिकशोधस्रोतः/ नीति

GYANBODH
An International Multidisciplinary Peer Reviewed Journal
ISSN:3048-9792
Volume: 3
Issue: 5
September-October: 2026

27. Black, Maureen M., Susan P. Walker, Lia C. H. Fernald, et al. "Early Childhood Development Coming of Age: Science Through the Life Course." *The Lancet*, vol. 389, no. 10064, 2017, pp. 77–90. Print.

28. Likhar, Akanksha, and Manoj S. Patil. "Importance of Maternal Nutrition in the First 1,000 Days of Life and Its Effects on Child Development: A Narrative Review." Cureus, vol. 14, no. 10, 8 Oct. 2022, e30083. PubMed Central, doi:10.7759/cureus.30083.

29. Draper, Catherine E., et al. "The Next 1000 Days: Building on Early Investments for the Health and Development of Young Children." *The Lancet*, vol. 404, no. 10467, 2024, pp. 2094–2116. doi:10.1016/S0140-6736(24)01389-8. Web.

30. Government of India, Ministry of Education. *National Education Policy 2020*. 2020. Web.

31. World Health Organization, UNICEF, and World Bank Group. *Nurturing Care for Early Childhood Development: A Framework for Helping Children Survive and Thrive to Transform Health and Human Potential*. World Health Organization, 2018. Web.